# Hiranyakashipukritam Brahmarudra Stotram

# हिरण्यकशिपुकृतं ब्रह्मरुद्रस्तोत्रम्

## Document Information

Text title : Hiranyakashipukritam Brahmarudra Stotram

File name : hiraNyakashipukRRitaMbrahmarudrastotram.itx

Category : shiva, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 1 | adhyAya 135/71-83||

Latest update : December 25, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2025

*sanskritdocuments.org*

# हिरण्यकशिपुकृतं ब्रह्मरुद्रस्तोत्रम्

रुद्रः प्राह तदा दैत्यं किं ते मनसि रोचते ॥ ७१ ॥

यदर्थं तप आतिष्ठो वृणु वरान्ददाम्यहम् ।
श्रुत्वा दृष्ट्वा च वरदं नत्वा गद्गदया गिरा ॥ ७२ ॥

नमः सर्वाधिभूताय सर्वान्तर्यामिणे नमः ।
तपःफलप्रदात्रे ते ब्रह्मणे शम्भवे नमः ॥ ७३ ॥

नमोऽस्तु जनकायाऽत्रभवते कश्यपाय च ।
नमो मरीचये तद्वत् सर्वर्षिभ्यो नमो नमः ॥ ७४ ॥

सर्वे शुभप्रदातारो भवन्तु मम सर्वदा ।
यदि देया वरा मह्यं पात्रं चाहं मतोऽस्मि वः ॥ ७५ ॥

सुराऽसुरमनुष्याणां गन्धर्वोरगरक्षसाम् ।
पशुपक्षिमृगाणां च सिद्धानां च महात्मनाम् ॥ ७६ ॥

यक्षविद्याधराणां चोद्भिज्जानां किन्नरात्मनाम् ।
किम्पुंसां सर्वरोगाणां मन्त्र्यायुधास्त्रयन्त्रिणाम् ॥ ७७ ॥

सर्वेषां दत्तशापानामवध्यत्वं च मे भवेत् ।
नाऽन्तर्बहिर्न दिवसे न रात्रौ चिज्जडैर्न च ॥ ७८ ॥

न पृथ्व्यां नाऽम्बरे मृत्युर्मम स्यादजसृष्टितः ।
युद्धे चाऽप्रतिद्वन्द्वत्वमैकपत्यं च देहिनाम् ॥ ७९ ॥

सर्वेषां लोकपालानामीश्वरत्वमखण्डितम् ।
तपोयोगप्रभावाणामविनाशो ममास्त्विति ॥ ८० ॥

इत्येते तु वराः स्वेष्टा दीयन्तां पितृभिश्च मे ।
ब्रह्माज्ञया तदा रुद्रः प्राह शिष्यं तपस्विनम् ॥ ८१ ॥

शिष्य चैते वराः जन्मवतां तु दुर्लभाः सदा ।

तथापि वितरामोऽद्य कः सृष्टौ शाश्वतो जनः ॥ ८२॥

इति दत्त्वा वरान् रुद्रब्रह्माद्याः केतनं ययुः ।
हिरण्यकशिपुश्चापि निववृते तपःस्थलात् ॥ ८३॥

इति श्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने १३५-अध्यायान्तर्गतं हिरण्यकशिपु कृतं ब्रह्म-रुद्रस्तोत्रं सम्पूर्णम् ।

लक्ष्मीनारायणीयसंहिता । खण्ड १। अध्याय १३५/७१-८३॥

lakShmInArAyaNIyasaMhitA . khaNDa 1. adhyAya 135/71-83..

Proofread by PSA Easwaran

*Hiranyakashipukritam Brahmarudra Stotram*

pdf was typeset on December 25, 2025

Please send corrections to *sanskrit@cheerful.com*